
हर हर शङ्कर ॐ जय जय शङ्कर





श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्रीमत्-शङ्करभगवत्पादाचार्य-पूजा-पद्धतिः ॥

**५१२८ पराभव-मेषः ४–८ / शाङ्कर-संवत्सरः २५३५**
**(१७.०४–२१.०४.२०२६)**

Shri Shankara Bhagavatpada incarnated 2534 years ago today, on Vaishakha Shukla Panchami (Panchami after Mesha Amavasya) of the Kali 2594th year (509 BCE).

Without seeking a life for Himself, He took sannyasa at the tender age of 8 and lived only until age 32. Within this time, He composed texts explaining Advaita as the philosophy of the Upanishads and Gita for the intellectually inclined. To help the common man relate to God, He composed many stotras and advocated equally worshipping all forms of God. He travelled across Bharata Desha on foot to propagate the Vaidika Sanatana Dharma.

It is because of the birth of Bhagavatpada that we continue to celebrate Shivaratri, Rama Navami, Gokulashtami etc. Otherwise the unorthodox practices prevalent at His time would have overpowered the Sanatana

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

traditions. Thus the significance of Shankara Jayanti is that it is the Jayanti which preserved all other Jayantis.

It is hence our duty to remember and worship Shri Shankara Bhagavatpada on this day. One may also do this starting from Prathama to Panchami or starting from Panchami. To help in this, we release this simple Puja Paddhati with Acharya's namavali and stotras on Him.

Shri Shankara Charitam Section in the fifth volume of Dheivatthin Kural/Voice of God of Shri Chandrashekharendra Sarasvati Shankaracharya Swamigal must be read by everyone on this punyadinam.

# ॥ पूजा-पद्धतिः ॥

(आचम्य)
[विघ्नेश्वरपूजां कृत्वा।]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

प्राणान् आयम्य।
(अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसन्त**-ऋतौ 2026-Apr-17 (FRI) / **५१२७-मेषः-४ (भृगुः) मेष-चैत्र**-मासे **कृष्ण**-पक्षे **अमावास्यायां** शुभतिथौ **भृगुवासरयुक्तायां रेवती**-नक्षत्र (१२:०१)युक्तायां **वैधृति**-योग (०७:२०; **विष्कम्भ**-योग); **विष्कम्भ**-योग; **प्रीति**-योगयुक्तायां **चतुष्पात्**-करण (०६:५०; **नागव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्याम् **अमावास्यायां**

2026-Apr-18 (SAT) / **५१२७-मेषः-५ (स्थिरः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **प्रथमायां** (१४:११) शुभतिथौ **स्थिर**वासरयुक्तायाम् **अश्विनी**-नक्षत्र (०९:४१)युक्तायां **प्रीति**-योगयुक्तायां **बव**-करण (१४:११; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **प्रथमायां** (१४:११)

2026-Apr-19 (SUN) / **५१२७-मेषः-६ (भानुः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **द्वितीयायां** (१०:४९) शुभतिथौ **भानु**वासरयुक्तायाम् **अपभरणी**-नक्षत्र (०७:०९; **कृत्तिका**-नक्षत्र)युक्तायाम् **आयुष्मद्**-योगयुक्तायां **कौलव**-करण (१०:४९; **तैतिल**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **द्वितीयायां** (१०:४९)

2026-Apr-20 (MON) / **५१२७-मेषः-७ (इन्दुः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **तृतीयायां** (०७:२८; **चतुर्थ्यां**) शुभतिथौ **इन्दु**वासरयुक्तायां **रोहिणी**-नक्षत्रयुक्तायां **सौभाग्य**-योगयुक्तायां **गरजा**-करण (०७:२८; **वणिजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **तृतीयायां** (०७:२८; **चतुर्थ्यां**)

2026-Apr-21 (TUE) / **५१२७-मेषः-८ (भौमः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **पञ्चम्यां** शुभतिथौ **भौम**वासरयुक्तायां **मृगशीर्ष**-नक्षत्रयुक्तायां **शोभन**-योग (१२:२९; **अतिगण्ड**-योग)युक्तायां **बव**-करण (१४:४५; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **पञ्चम्यां**

शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थम्

- उत्तराषाढा-नक्षत्रे धनूराशौ आविर्भूतानां श्रीमत्-शङ्कर-विजयेन्द्र-सरस्वती-श्रीपादानां, शतभिषङ्-नक्षत्रे कुम्भ-राशौ आविर्भूतानां श्रीमत्-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीपादानाम् अस्माकं जगद्गुरूणां दीर्घ-आयुः-आरोग्य-सिद्ध्यर्थं,
- तैः सङ्कल्पितानां सर्वेषां लोक-क्षेमार्थ-कार्याणां वेद-शास्त्रादि-सम्प्रदाय-पोषण-कार्याणां विविध-क्षेत्र-यात्रायाश्च अविघ्नतया सम्पूर्त्यर्थं
- कामकोटि-गुरु-परम्परायां कामकोटि-भक्त-जनानाम् अचञ्चल-भावशुद्ध-दृढतर-भक्ति-सिद्ध्यर्थं, परस्पर-ऐकमत्य-सिद्ध्यर्थं

- भारतीयानां महाजनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां सन्ततेः सनातन-सम्प्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुम्बानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्रीमत्-शङ्करभगवत्पाद-प्रीत्यर्थं श्री-शङ्कर-जयन्ती-महोत्सवे यथाशक्ति-ध्यान-आवाहना·दि-षोडशोपचारैः श्रीमत्-शङ्कर-भगवत्पादा·चार्य-पूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये। [कलश-पूजां कृत्वा।]

# प्रधान-पूजा

श्रुति-स्मृति-पुराणानाम् आलयं करुणा·लयम्।
नमामि भगवत्पाद-शङ्करं लोक-शङ्करम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्यान् ध्यायामि।

अज्ञाना·न्त·र्गहन-पतितान् आत्म-विद्यो·पदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान्।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतन्ती
शम्भो·र्मूर्ति·श्चरति भुवने शङ्करा·चार्य-रूपा॥

(नमस्ते रुद्र ...)
य·माश्रिता गिरां देवी नन्दय·त्यात्म-संश्रितान्।
त·माश्रये श्रिया जुष्टं शङ्करं करुणा-निधिम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्यान् आवाहयामि।

(या त इषुः ...)
श्री-गुरुं भगवत्पादं शरण्यं भक्त-वत्सलम्।
शिवं शिव-करं शुद्धम् अप्रमेयं नमा·म्यहम्॥

श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, आसनं समर्पयामि।

नित्यं शुद्धं नि·राकारं नि·राभासं नि·रञ्जनम्।
नित्य-बोधं चि·दानन्दं गुरुं ब्रह्म नमा·म्यहम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, स्वागतं व्याहरामि। पूर्ण-कुम्भं समर्पयामि।

(या ते . . .)
सर्व-तन्त्र-स्व-तन्त्राय स·दात्मा·द्वैत-रूपिणे।
श्रीमते शङ्करा·र्याय वेदान्त-गुरवे नमः॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, पाद्यं समर्पयामि।

(यामिषुम् . . .)
वेदान्ता·र्था·भिधानेन सर्वा·नुग्रह-कारिणम्।
यति-रूप-धरं वन्दे शङ्करं लोक-शङ्करम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, अर्घ्यं समर्पयामि।

(शिवेन वचसा . . .)
संसारा·ब्धि-निषण्णा·ज्ञ-निकर-प्रोद्दिधीर्षया।
कृत-संहननं वन्दे भगवत्पाद-शङ्करम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, आचमनीयं समर्पयामि।
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, मधुपर्कं समर्पयामि।

(अध्यवोचत् . . .)
यत्-पाद-पङ्कज-ध्यानात् तोटका·द्या यती·श्वराः।
बभूवु·स्तादृशं वन्दे शङ्करं ष·ण्मते·श्वरम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, स्नपयामि।
(श्रीरुद्र-चमक-पुरुषसूक्त-उपनिषद्भिः स्नापयित्वा) स्नाना·नन्तरम् आचमनीयं समर्पयामि।

(असौ यस्ताम्रः . . .)
नमः श्री-शङ्करा·चार्य-गुरवे शङ्करा·त्मने।
शरीरिणां शङ्कराय शङ्कर-ज्ञान-हेतवे॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, वस्त्रं समर्पयामि।

(असौ योऽवसर्पति . . .)
हर-लीला·वताराय शङ्कराय वरौ·जसे।
कैवल्य-कलना-कल्प-तरवे गुरवे नमः॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, यज्ञो·पवीतं समर्पयामि।

प्रचार्यं सर्व-लोकेषु सञ्चार्यं हृदया·म्बुजे।
विचार्यं सर्व-वेदान्तैः आचार्यं शङ्करं भजे॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, भस्मो·द्धूलनं रुद्राक्ष-मालिकां च समर्पयामि।

(नमो अस्तु . . .)
याऽनुभूतिः स्वयं-ज्योतिः आदित्ये·शान-विग्रहा।
शङ्करा·ख्या च तं नौमि सुरेश्वर-गुरुं परम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, दिव्य-परिमल-गन्धान् धारयामि।
गन्धस्यो·परि हरिद्रा-कुङ्कुमं समर्पयामि।

आनन्द-घन·मद्वन्द्वं नि·र्विकारं नि·रञ्जनम्।
भजेऽहं भगवत्पादं भजता·मभय-प्रदम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, दण्डं समर्पयामि।

(प्रमुञ्च . . .)
तं वन्दे शङ्करा·चार्यं लोक-त्रितय-शङ्करम्।
सत्-तर्क-नखरो·द्दीर्ण-वावदूक-मतङ्गजम्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, अक्षतान् समर्पयामि।

(अवतत्य . . .)

नमामि शङ्करा·चार्य-गुरु-पाद-सरोरुहम्।
यस्य प्रसादा·न्मूढोऽपि सर्व-ज्ञो भवति स्वयम्॥

श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, पुष्प-मालां समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्री-शङ्कर-चतुर्विंशति-नामावल्या अङ्गपूजा ॥

| | | |
|---|---|---|
| १. | अष्ट-वर्ष-चतु·र्वेदिने नमः | पादौ पूजयामि |
| २. | द्वादशा·खिल-शास्त्र-विदे नमः | गुल्फौ पूजयामि |
| ३. | सर्व-लोक-ख्यात-शीलाय नमः | जङ्घे पूजयामि |
| ४. | प्रस्थान-त्रय-भाष्य-कृते नमः | जानुनी पूजयामि |
| ५. | पद्मपादा·दि-स·च्छिष्याय नमः | ऊरू पूजयामि |
| ६. | पाषण्ड-ध्वान्त-भास्कराय नमः | कटिं पूजयामि |
| ७. | अद्वैत-स्थापना·चार्याय नमः | गुह्यं पूजयामि |
| ८. | द्वैता·दि-द्विप-केसरिणे नमः | नाभिं पूजयामि |
| ९. | व्यास-नन्दित-सिद्धान्ताय नमः | उदरं पूजयामि |
| १०. | वाद-निर्जित-मण्डनाय नमः | वक्षःस्थलं पूजयामि |
| ११. | ष·ण्मत-स्थापना·चार्याय नमः | हृदयं पूजयामि |
| १२. | षड्-गुणै·श्वर्य-मण्डिताय नमः | कण्ठं पूजयामि |
| १३. | सर्व-लोका·नुग्रह-कृते नमः | स्कन्धौ पूजयामि |
| १४. | सर्व-ज्ञ-त्वा·दि-भूषणाय नमः | हस्तौ पूजयामि |
| १५. | श्रुति-स्मृति-पुराणा·र्थाय नमः | वक्त्रं पूजयामि |
| १६. | श्रु·त्येक-शरण-प्रियाय नमः | चिबुकं पूजयामि |
| १७. | सकृत्-स्मरण-सन्तुष्टाय नमः | ओष्ठौ पूजयामि |
| १८. | शरणा·गत-वत्सलाय नमः | कपोलौ पूजयामि |
| १९. | नि·र्व्याज-करुणा-मूर्तये नमः | नासिकां पूजयामि |
| २०. | नि·रहम्भाव-गोचराय नमः | नेत्रे पूजयामि |
| २१. | संशान्त-भक्त-हृत्-तापाय नमः | कर्णौ पूजयामि |
| २२. | सर्व-ज्ञान-फल-प्रदाय नमः | ललाटं पूजयामि |
| २३. | स·दसद्-वस्तु-विमुखाय नमः | शिरः पूजयामि |
| २४. | सत्ता-सामान्य-विग्रहाय नमः | सर्वा·ण्यङ्गानि पूजयामि |

# श्रीमत्-शङ्कर-भगवत्पादा·चार्य-अष्टो·त्तर-शत-नामा·वलिः

श्री-शङ्करा·चार्य-वर्याय नमः
ब्रह्म-ज्ञान-प्रदायकाय नमः
अज्ञान-तिमिरा·दित्याय नमः
सुज्ञाना·म्बुधि-चन्द्रमसे नमः
वर्णा·श्रम-प्रतिष्ठात्रे नमः
श्री-मते नमः
मुक्ति-प्रदायकाय नमः
शिष्यो·पदेश-निरताय नमः
भक्ता·भीष्ट-प्रदायकाय नमः
सूक्ष्म-तत्त्व-रहस्य-ज्ञाय नमः १०
कार्या·कार्य-प्रबोधकाय नमः
ज्ञान-मुद्रा·ञ्चित-कराय नमः
शिष्य-हृत्-ताप-हारकाय नमः
पारिव्राज्या·श्रमो-द्धर्त्रे नमः
सर्व-तन्त्र-स्वतन्त्र-धिये नमः
अद्वैत-स्थापना·चार्याय नमः
साक्षा·च्छङ्कर-रूप-भृते नमः
ष·ण्मत-स्थापना·चार्याय नमः
त्रयी-मार्ग-प्रकाशकाय नमः
वेद्-वेदान्त-तत्त्व-ज्ञाय नमः २०
दुर्वादि-मत-खण्डनाय नमः
वैराग्य-निरताय नमः
शान्ताय नमः
संसारा·र्णव-तारकाय नमः
प्रसन्न-वदना·म्भोजाय नमः
परमा·र्थ-प्रकाशकाय नमः
पुराण-स्मृति-सार-ज्ञाय नमः
नित्य-तृप्ताय नमः
महते नमः
शुचये नमः ३०
नित्या·नन्दाय नमः
नि·रातङ्काय नमः
नि·स्सङ्गाय नमः
नि·र्मला·त्मकाय नमः
नि·र्ममाय नमः
नि·रहङ्काराय नमः
विश्व-वन्द्य-पदा·म्बुजाय नमः
सत्त्व-प्रधानाय नमः
सद्-भावाय नमः
सङ्ख्या·तीत-गुणो·ज्ज्वलाय नमः ४०
अनघाय नमः
सार-हृदयाय नमः
सुधिये नमः
सारस्वत-प्रदाय नमः
सत्या·त्मने नमः
पुण्य-शीलाय नमः
साङ्ख्य-योग-विचक्षणाय नमः
तपो·राशये नमः
महा-तेजसे नमः
गुण-त्रय-विभाग-विदे नमः ५०
कलि-घ्नाय नमः
काल-धर्म-ज्ञाय नमः
तमो·गुण-निवारकाय नमः


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

भगवते नमः
भारती-जेत्रे नमः
शारदा·ह्वान-पण्डिताय नमः
धर्मा·धर्म-विभाग-ज्ञाय नमः
लक्ष्य-भेद-प्रदर्शकाय नमः
नाद-बिन्दु-कला·भिज्ञाय नमः
योगि-हृत्-पद्म-भास्कराय नमः ६०
अती·न्द्रिय-ज्ञान-निधये नमः
नित्या·नित्य-विवेक-वते नमः
चि·दानन्दाय नमः
चि·न्मया·त्मने नमः
पर-काय-प्रवेश-कृते नमः
अमानुष-चरित्रा·ढ्याय नमः
क्षेम-दायिने नमः
क्षमा-कराय नमः
भवाय नमः
भद्र-प्रदाय नमः ७०
भूरि-महिम्ने नमः
विश्व-रञ्जकाय नमः
स्व-प्रकाशाय नमः
स·दाधाराय नमः
विश्व-बन्धवे नमः
शुभो·दयाय नमः
विशाल-कीर्तये नमः
वा·गीशाय नमः
सर्व-लोक-हितो·त्सुकाय नमः
कैलास-यात्रा-सम्प्राप्त-चन्द्रमौलि-
प्रपूजकाय नमः ८०
काञ्च्यां श्रीचक्र-राजा·ख्य-यन्त्र-
स्थापन-दीक्षिताय नमः
श्रीचक्रा·त्मक-ताटङ्क-पोषिता·म्बा-
मनोरथाय नमः
श्री-ब्रह्म-सूत्रो·पनिषद्-भाष्या·दि-ग्रन्थ-
कल्पकाय नमः
चतु·र्दिक्-चतु·राम्नाय-प्रतिष्ठात्रे नमः
महा-मतये नमः
द्विसप्तति-मतो·च्छेत्त्रे नमः
सर्व-दिग्-विजय-प्रभवे नमः
काषाय-वसनो·पेताय नमः
भस्मो·द्धूलित-विग्रहाय नमः
ज्ञाना·त्मकै·क-दण्डा·ढ्याय नमः ९०
कमण्डलु-लसत्-कराय नमः
व्यास-सन्दर्शन-प्रीताय नमः
भगवत्पाद-संज्ञकाय नमः
सौन्दर्य-लहरी-मुख्य-बहु-स्तोत्र-
विधायकाय नमः
चतुष्षष्टि-कला·भिज्ञाय नमः
ब्रह्मराक्षस-मोक्ष-दाय नमः
श्रीम·न्मण्डन-मिश्रा·ख्य-स्वयम्भू-
जय-सन्नुताय नमः
तोटका·चार्य-सम्पूज्याय नमः
पद्मपादा·र्चिता·ङ्घ्रिकाय नमः
हस्तामलक-योगी·न्द्र-ब्रह्म-ज्ञान-
प्रदायकाय नमः १००
सुरेश्वरा·दि-स·च्छिष्य-संन्यासा·श्रम-
दायकाय नमः
नि·र्व्याज-करुणा-मूर्तये नमः
जगत्-पूज्याय नमः
जगद्-गुरवे नमः

भेरी-पटह-वाद्या·दि-राज-लक्षण-
लक्षिताय नमः
सकृत्-स्मरण-सन्तुष्टाय नमः
सर्व-ज्ञाय नमः
ज्ञान-दायकाय नमः १०८

॥ इति श्रीमत्-शङ्कर-भगवत्पादा·चार्याष्टोत्तरशतनामावलिः सम्पूर्णा ॥
श्री-शङ्कर-भगवत्पादाचार्येभ्यो नमः, अष्टोत्तरशतनामार्चनं समर्पयामि।

# आचार्यपरम्परानामावलिः

## ॥ पूर्वाचार्याः ॥

१. श्रीमते दक्षिणामूर्तये नमः
२. श्रीमते विष्णवे नमः
३. श्रीमते ब्रह्मणे नमः
४. श्रीमते वसिष्ठाय नमः
५. श्रीमते शक्तये नमः
६. श्रीमते पराशराय नमः
७. श्रीमते व्यासाय नमः
८. श्रीमते शुकाय नमः
९. श्रीमते गौडपादाय नमः
१०. श्रीमते गोविन्द-भगवत्पादाय नमः
११. श्रीमते शङ्कर-भगवत्पादाय नमः

## ॥ भगवत्पादशिष्याः ॥

१. श्रीमते पद्मपादाचार्याय नमः
२. श्रीमते सुरेश्वराचार्याय नमः
३. श्रीमते हस्तामलकाचार्याय नमः
४. श्रीमते तोटकाचार्याय नमः
५. श्रीमते पृथिवीधवाचार्याय नमः
६. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः
७. अन्येभ्यः भगवत्पाद-शिष्येभ्यो नमः

## ॥ कामकोटि-आचार्याः ॥

१. श्रीमते शङ्कर-भगवत्पादाय नमः
२. श्रीमते सुरेश्वराचार्याय नमः
३. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः
४. श्रीमते सत्यबोध-इन्द्रसरस्वत्यै नमः
५. श्रीमते ज्ञानानन्द-इन्द्रसरस्वत्यै नमः
६. श्रीमते शुद्धानन्द-इन्द्रसरस्वत्यै नमः
७. श्रीमते आनन्दज्ञान-इन्द्रसरस्वत्यै नमः
८. श्रीमते कैवल्यानन्द-इन्द्रसरस्वत्यै नमः
९. श्रीमते कृपाशङ्कर-इन्द्रसरस्वत्यै नमः
१०. श्रीमते विश्वरूप-सुरेश्वर-इन्द्रसरस्वत्यै नमः
११. श्रीमते शिवानन्द-चिद्धन-इन्द्रसरस्वत्यै नमः
१२. श्रीमते सार्वभौम-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
१३. श्रीमते काष्ठमौन-सच्चिद्धन-इन्द्रसरस्वत्यै नमः
१४. श्रीमते भैरवजिद्-विद्याघन-इन्द्रसरस्वत्यै नमः
१५. श्रीमते गीष्पति-गङ्गाधर-इन्द्रसरस्वत्यै नमः
१६. श्रीमते उज्ज्वलशङ्कर-इन्द्रसरस्वत्यै नमः
१७. श्रीमते गौड-सदाशिव-इन्द्रसरस्वत्यै नमः
१८. श्रीमते सुर-इन्द्रसरस्वत्यै नमः
१९. श्रीमते मार्तण्ड-विद्याघन-इन्द्रसरस्वत्यै नमः
२०. श्रीमते मूकशङ्कर-इन्द्रसरस्वत्यै नमः
२१. श्रीमते जाह्नवी-चन्द्रचूड-इन्द्रसरस्वत्यै नमः
२२. श्रीमते परिपूर्णबोध-इन्द्रसरस्वत्यै नमः
२३. श्रीमते सच्चित्सुख-इन्द्रसरस्वत्यै नमः
२४. श्रीमते कोङ्कण-चित्सुख-इन्द्रसरस्वत्यै नमः
२५. श्रीमते सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः
२६. श्रीमते प्रज्ञाघन-इन्द्रसरस्वत्यै नमः
२७. श्रीमते चिद्विलास-इन्द्रसरस्वत्यै नमः
२८. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
२९. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
३०. श्रीमते भक्तियोग-बोध-इन्द्रसरस्वत्यै नमः

३१. श्रीमते शीलनिधि-ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
३२. श्रीमते चिदानन्दघन-इन्द्रसरस्वत्यै नमः
३३. श्रीमते भाषापरमेष्ठि-सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः
३४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
३५. श्रीमते बहुरूप-चित्सुख-इन्द्रसरस्वत्यै नमः
३६. श्रीमते चित्सुखानन्द-इन्द्रसरस्वत्यै नमः
३७. श्रीमते विद्याघन-इन्द्रसरस्वत्यै नमः
३८. श्रीमते धीरशङ्कर-इन्द्रसरस्वत्यै नमः
३९. श्रीमते सच्चिद्विलास-इन्द्रसरस्वत्यै नमः
४०. श्रीमते शोभन-महादेव-इन्द्रसरस्वत्यै नमः
४१. श्रीमते गङ्गाधर-इन्द्रसरस्वत्यै नमः
४२. श्रीमते ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
४३. श्रीमते आनन्दघन-इन्द्रसरस्वत्यै नमः
४४. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
४५. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः
४६. श्रीमते सान्द्रानन्द-बोध-इन्द्रसरस्वत्यै नमः
४७. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
४८. श्रीमते अद्वैतानन्दबोध-इन्द्रसरस्वत्यै नमः
४९. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
५०. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५१. श्रीमते विद्यातीर्थ-इन्द्रसरस्वत्यै नमः
५२. श्रीमते शङ्करानन्द-इन्द्रसरस्वत्यै नमः

- श्रीमते अद्वैतब्रह्मानन्दाय नमः
- श्रीमते विद्यारण्याय नमः
- अन्येभ्यः विद्यातीर्थ-शङ्करानन्द-शिष्येभ्यो नमः

५३. श्रीमते पूर्णानन्द-सदाशिव-इन्द्रसरस्वत्यै नमः
५४. श्रीमते व्यासाचल-महादेव-इन्द्रसरस्वत्यै नमः
५५. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५६. श्रीमते सदाशिवबोध-इन्द्रसरस्वत्यै नमः
५७. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः

○ श्रीमते सदाशिवब्रह्म-इन्द्रसरस्वत्यै नमः

५८. श्रीमते विश्वाधिक-आत्मबोध-इन्द्रसरस्वत्यै नमः
५९. श्रीमते भगवन्नाम-बोध-इन्द्रसरस्वत्यै नमः
६०. श्रीमते अद्वैतात्मप्रकाश-इन्द्रसरस्वत्यै नमः
६१. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६२. श्रीमते शिवगीतिमाला-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६३. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६५. श्रीमते सुदर्शन-महादेव-इन्द्रसरस्वत्यै नमः
६६. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६७. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६८. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६९. श्रीमते जयेन्द्रसरस्वत्यै नमः
७०. श्रीमते शङ्करविजयेन्द्रसरस्वत्यै नमः
७१. श्रीमते सत्य-चन्द्रशेखरेन्द्रसरस्वत्यै नमः

श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, नानाविध-परिमल-पत्र-पुष्पाणि समर्पयामि।

(विज्यम् ...)
संसार-सागरं घोरम् अनन्त-क्लेश-भाजनम्।
त्वा·मेव शरणं प्राप्य निस्तरन्ति मनीषिणः॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, धूपम् आघ्रापयामि।

(या ते ...)
नम·स्तस्मै भगवते शङ्करा·चार्य-रूपिणे।
येन वेदान्त-विद्ये·यम् उद्धृता वेद-सागरात्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, दीपं दर्शयामि।

(नमस्ते अस्त्वायुधाय ...)

भगवत्पाद-पादा·ब्ज-पांसवः सन्तु सन्ततम्।
अपारा·सार-संसार-सागरो·त्तार-सेतवः ॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि।
निवेदना·नन्तरम् आचमनीयं समर्पयामि।

(परि ते ...)

श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, ताम्बूलं समर्पयामि।

(नमस्ते अस्तु भगवन् ...)
अज्ञान-तिमिरान्धस्य ज्ञानाञ्जन-शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, नीराजनं दर्शयामि। नीराजना·नन्तरम् आचमनीयं समर्पयामि।
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, समस्तोपचारान् समर्पयामि।

यानि कानि च पापानि जन्मान्तर-कृतानि च।
तानि तानि विनश्यन्ति प्रदक्षिण-पदे पदे॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, प्रदक्षिणं करोमि।

आचार्यान् भगवत्पादान् ष·ण्मत-स्थापकान् हितान्।
परहंसान् नुमोऽद्वैत-स्थापकान् जगतो गुरून्॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, नमस्कारान् समर्पयामि।

गुरु·र्ब्रह्मा गुरु·र्विष्णु·र्गुरु·र्देवो महे·श्वरः।
गुरु·रेव परं ब्रह्म तस्मै श्री-गुरवे नमः॥

अखण्ड-मण्डला·कारं व्याप्तं येन चराचरम्।
तत्-पदं दर्शितं येन तस्मै श्री-गुरवे नमः॥

अनेक-जन्म-संप्राप्त-कर्म-बन्ध-विदाहिने ।
आत्म-ज्ञान-प्रदानेन तस्मै श्री-गुरवे नमः॥

विशुद्ध-विज्ञान-घनं शुचिं हार्द-तमो·नुदम्।
दया-सिन्धुं लोक-बन्धुं शङ्करं नौमि सद्-गुरुम्॥

देह-बुद्ध्या तु दासोऽस्मि जीव-बुद्ध्या त्व·दंशकः।
आत्म-बुद्ध्या त्व·मेवा·ह·मिति मे निश्चिता मतिः॥

एकः शाखी शङ्करा·ख्य·श्चतुर्धा
स्थानं भेजे ताप-शान्त्यै जनानाम्।
शिष्य-स्कन्धैः शिष्य-शाखै·र्महद्भिः
ज्ञानं पुष्पं यत्र मोक्षः प्रसूतिः॥

गा·माक्रम्य पदेऽधिकाञ्चि निबिडं स्कन्धै·श्चतुर्भि·स्तथा
व्यावृण्वन् भुवनान्तरं परिहरं·स्तापं स-मोह-ज्वरम्।
यः शाखी द्विज-संस्तुतः फलति तत् स्वाद्यं रसा·ख्यं फलम्
तस्मै शङ्कर-पादपाय महते तन्म·स्त्रि-सन्ध्यं नमः॥
श्रीमत्-शङ्कर-भगवत्पादा·चार्येभ्यो नमः, स्तोत्रं समर्पयामि।
प्रार्थनाः समर्पयामि।

गुरु-पादो·दक-प्राशनम्—

अविद्या-मूल-नाशाय जन्म-कर्म-निवृत्तये।
ज्ञान-वैराग्य-सि·द्ध्यर्थं गुरु-पादो·दकं शुभम्॥

## ॥ स्वस्ति-वचनम्॥

- स्वस्ति श्रीमद्-अखिल-भूमण्डला·लङ्कार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमा·धिष्ठान-सत्यव्रत-नामाङ्कित-काञ्ची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्
- अतुलित-सुधा-रस-माधुर्य-कमला·सन-कामिनी-धम्मिल्ल-सम्फुल्ल-मल्लिका-मालिका-निःष्यन्द-मकरन्द-झरी-सौवस्तिक-वा·ङ्निगुम्फ-विजृम्भणा·नन्द-तुन्दिलित-मनीषि-मण्डलानाम्

- अनवरता·द्वैत-विद्या-विनोद-रसिकानां निरन्तरा·लङ्कृती-कृत-शान्ति-दान्ति-भूम्नाम्
- सकल-भुवन-चक्र-प्रतिष्ठापक-श्रीचक्र-प्रतिष्ठा-विख्यात-यशो·लङ्कृतानाम्
- निखिल-पाषण्ड-षण्ड-कण्टको·त्पाटनेन विशदी-कृत-वेद-वेदान्त-मार्ग-षण्मत-प्रतिष्ठापका·चार्याणाम्
- परमहंस-परिव्राजका·चार्य-वर्य-जगद्-गुरु-श्रीमत्-शङ्कर-भगवत्पादा·चार्याणाम्
- अधिष्ठाने सिंहासना·भिषिक्त-श्रीमद्-जयेन्द्र-सरस्वती-श्रीपादानाम्
- अन्तेवासि-वर्य-श्रीमत्-शङ्करविजयेन्द्र-सरस्वती-श्रीपादानां
- त·दन्तेवासि-वर्य-श्रीमत्-सत्य-चन्द्रशेखरे·न्द्र-सरस्वती-श्रीपादानां च
- चरण-नलिनयोः स-प्रश्रयं सा·ञ्जलि-बन्धं च नमस्कुर्मः ॥

# ॥ तोटकाष्टकम् ॥

विदिता·खिल-शास्त्र-सुधा-जलधे
महितो·पनिषत्-कथिता·र्थ-निधे।
हृदये कलये विमलं चरणं
भव शङ्कर देशिक मे शरणम् ॥ १ ॥

करुणा-वरुणा·लय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचया·खिल-दर्शन-तत्त्व-विदं
भव शङ्कर देशिक मे शरणम् ॥ २ ॥

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारु-मते।
कलये·श्वर-जीव-विवेक-विदं
भव शङ्कर देशिक मे शरणम् ॥ ३ ॥

भव एव भवा·निति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शङ्कर देशिक मे शरणम् ॥ ४ ॥

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीन·मिमं परिपालय मां
भव शङ्कर देशिक मे शरणम्॥५॥

जगती·मवितुं कलिता·कृतयो
विचरन्ति महा-महस·श्छलतः।
अहिमां·शु·रिवा·त्र विभासि पुरो*
भव शङ्कर देशिक मे शरणम्॥६॥

गुरु-पुङ्गव पुङ्गव-केतन ते
समता·मयतां न हि कोऽपि सुधीः।
शरणा·गत-वत्सल तत्त्व-निधे
भव शङ्कर देशिक मे शरणम्॥७॥

विदिता न मया विशदै·क-कला
न च किञ्चन काञ्चन·मस्ति गुरो।
द्रुत·मेव विधेहि कृपां सह-जां
भव शङ्कर देशिक मे शरणम्॥८॥

॥इति श्री-तोटकाचार्यविरचितं श्री-तोटकाष्टकं सम्पूर्णम्॥

[* गुरो इति पाठान्तरम्]

जय जय शङ्कर हर हर शङ्कर
जय जय शङ्कर हर हर शङ्कर।
काञ्ची-शङ्कर कामकोटि-शङ्कर
हर हर शङ्कर जय जय शङ्कर॥


कायेन वाचा मनसे·न्द्रियै·र्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद् यत् सकलं परस्मै
नारायणाये·ति समर्पयामि॥

अनेन पूजनेन श्रीमत्-शङ्कर-भगवत्पादा·चार्याः प्रीयन्ताम्।

ॐ तत् सद् ब्रह्मार्पणमस्तु।

❁

# ॥ श्रीशङ्कराचार्यवर्यम् - गीतम् - गणेशशास्त्रिणा विरचितम् ॥




You Tube https://youtu.be/XAn1vD4lFv4

श्री-शङ्कराचार्य-वर्यम् -
चन्द्रचूडावतारं भजे ज्ञान-मूर्तिम् ॥ ० ॥
अद्वैत-सिद्धान्त-मूलम् -
द्वैत-वादाख्य-मत्तेभ-पञ्चास्य-लीलम् ।
भस्म-त्रिपुण्ड्राङ्ग-फालम् -
सूत्र-भाष्यादि-निर्णीत-वेदान्त-भावम् ॥ १ ॥
नाना-विध-स्तोत्र-गीतैः -
सर्व-लोकोपकार-क्रियायां प्रवृत्तम् ।
दुर्वादि-वादाभ्र-वातम् -
दूर-दूरास्त-कामादि-दुर्वैरि-बृन्दम् ॥ २ ॥
काषाय-संवीत-गात्रम् -
यौवन-श्री-समाश्लिष्ट-सर्वाङ्गमीड्यम् ।
कारुण्य-सम्पूर्ण-नेत्रम् -
मन्द-हासोल्लसद्-वक्त्रमानन्द-पात्रम् ॥ ३ ॥
शिष्यैश्चतुर्भिः समेतम् -
वाम-हस्त-स्थ-वेदान्त-सिद्धान्त-कोशम् ।
वीरासने सन्निषण्णम् -
दक्ष-हस्ताग्र-भागे लसज्ज्ञान-मुद्रम् ॥ ४ ॥
संसार-दावाग्नि-तप्तम् -
ज्ञान-वृष्टि-प्रदानेन लोकं समस्तम् ।
दुःख-त्रयान्मोचयन्तम् -

नेत्र-निर्वाण-संदायि-रूपं यतीन्द्रम्॥५॥
गोविन्द-योगीन्द्र-शिष्यम् -
शारदा-पीठ-निक्षिप्त-वागीश-दारम्।
साक्षात्कृत-ब्रह्म-तत्त्वम् -
षण्मत-स्थापकाचार्य-कीर्त्या लसन्तम्॥६॥
तत्-तन्मठेषु स्व-शिष्यान् - स्थापयित्वा स्वयं कामकोट्याख्य-पीठे।
काञ्चीपुर-स्थेऽधिरुह्य -
सर्व-लोकोपदेश-क्रियायां प्रवृत्तम्॥७॥
इत्थं गणेशेन गीतम् -
स्तोत्रमेतत् पठेद् यः स्मरन् शङ्करार्यम्।
नश्यन्ति पापानि तस्य -
ज्ञान-लाभः शुभानां भवेच्चापि वृद्धिः॥८॥
॥इति नयतन्त्रपदाभिज्ञेन शिरोमणिविरुदभूषितेन गणेशशास्त्रिणा विरचितं श्रीशङ्कराचार्यगीतं सम्पूर्णम्॥

# ॥ श्रीमच्चिद्विलासीय-शङ्करविजयविलासे श्रीमत्-शङ्कर-भगवत्पाद-अवतार-घट्टः ॥




https://youtu.be/58KGBYZVUeM

Vijnanakanda, the student approached the excellent yati Cidvilasa saying, "O Guru! You read the charitam of Shri Shankaracharya every day. You also have said that it is capable of removing the evils of Kali and bestowing tattvajnana. Therefore, you must expound this to me in full with compassion". The Shankaracharitam that was accordingly imparted by Him is known as Chidvilasiya Shankara Vijayam.

This was published in 1973 by Bharatiya Vidya Bhavan as the 33rd title under the series Bharatiya Vidya. The editors of this series were Prof. Jayanta Krishna Dave and Prof. Upadhyaya. This was critically edited from four different hand-written manuscripts by Prof. Antarkar who worked in the Samskrta department of Kalsa College in Mumbai. It is the custom in the Kanchi Kamakoti Pitham to do parayana of the Shri Shankara Bhagavatpada Avatara Ghatta and Sarvajna Pitharohana Ghatta of the above Shankara Vijayam during occasions such as Shri Shankara Jayanti. Hence, in order that everyone understands this easily, Shri Kanchi Kamakoti Pithadipati Shri Shankaracharya Swamigal has ordained that this be released with translation. Accordingly, this version has been compiled with adhyaya and shloka numbers as per that edition. May bhaktas use this for Parayanam at appropriate times and attain the blessings of Bhagavatpada!

# ॥ पञ्चमोऽध्यायः ॥

व्यराजत तदार्याम्बा शिवैकायत्तचेतना ।
दृष्ट्वा शिवगुरुर्यज्वा भार्यामार्यां च गर्भिणीम् ॥ ३४ ॥
वृषाचलेशं सततं स्मरन्नेकाग्रचेतसा ।
दयालुतां स्तुवन् शम्भोर्दीनेष्वपि महत्स्वपि ॥ ३५ ॥
ववृधे स पयोराशिः पूर्णेन्दोरिव दर्शनात् ।

At that time, Aryamba glowed with her mind devoted to Shiva. Shivaguru, who had done many yajnas, seeing his pregnant wife, fixing his mind upon Vrshachaleshvara (the Vadakkunnatha of Trichur whom they had worshipped seeking progeny), praising the compassion of Shambhu towards the great and the destitute alike, swelled (with happiness) like the ocean seeing the full moon.

ततः सा दशमे मासि सम्पूर्णशुभलक्षणे ॥ ३६ ॥
दिवसे माधवर्तौ च स्वोच्चस्थे ग्रहपञ्चके ।
मध्याह्ने चाभिजिन्नाममुहूर्ते चार्द्रया युते ॥ ३७ ॥

After that, She (Aryamba) in the tenth month in Vasanta kala, on a day filled with all auspicious signs, when five grahas were in exaltation, in the asterism of Ardra (Tiruvadirai) at noon, in the Abhijit muhoorta,

उदयाचलवेलेव भानुमन्तं महौजसम् ।
प्रासूत तनयं साध्वी गिरिजेव षडाननम् ॥ ३८ ॥
जयन्तमिव पौलोमी व्यासं सत्यवती यथा ।

gave birth, just as the edge of the eastern mountain appears to create the bright sun, just as Parvati (birthed) the six-faced (Subrahmanya), just as Indrani (birthed) Jayanta, just as Satyavati (birthed) Bhagavan Veda Vyasa.

तदैवाग्रे निरीक्ष्येयमनुभूयेव वेदनाम् ॥ ३९ ॥

चतुर्भुजमुदाराङ्गं त्रिणेत्रं चन्द्रशेखरम् ।
दुर्निरीक्ष्यैः स्वतेजोभिर्भासयन्तं दिशो दश ॥ ४० ॥
दिवाकरकराकारैर्गौरैरीषद्विलोहितैः ।

It was as though she experienced the pain of labour (but then) she saw (Shiva) with four arms and a broad body and three eyes and a crescent moon on the forehead, brightening the ten directions by His splendour akin to the sun's rays, difficult to see directly, and white mixed with a bit of red (in hue).

एवमाकारमालोक्य विस्मिता विह्वला भिया ॥ ४१ ॥
किं किं किमिदमाश्चर्यमन्यदेव मदीप्सितम् ।
परं त्वन्यत् समुद्भूतमिति चिन्ताभृति स्वयम् ॥ ४२ ॥
उद्वीक्षन्त्यां प्रणमितुं तस्यां कुतुकतायुजि ।
ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरिक्षगाः ॥ ४३ ॥

Seeing such a form, astonished and shaken by fear, thought to herself, "Ah! What! What! What a wonder! It was something else I desired! But something else has appeared here." Seeing thus, as she was eager to pay obeisance, the Devas showered flowers from the skies.

कह्लारकलिकागन्धबन्धुरो मरुदाववौ ।
दिशः प्रकाशिताकाशाः सा धरा सादरा बभौ ॥ ४४ ॥

The breeze blew with the fragrance of water lilies. The sky was bright in all directions. The earth too shone resplendently.

प्रायः प्रदक्षिणज्वाला जज्वलुर्यज्ञपावकाः ।
प्रसन्नमभवच्चित्तं सतां प्रतपतामपि ॥ ४५ ॥

The agnis of Yajnas burned bright everywhere with tongues that circled to the right. The minds of the good and tapasvis cleared and filled with joy.

इत्थमन्यद्विलोक्यापि प्रश्रिता विनयान्विता ।
वृषाचलेशं निश्चित्य प्रादुर्भूतमतन्द्रिता ॥ ४६ ॥
स्वामिन् दर्शय मे लीला बालभावक्रमोचिताः ।
इत्थं सा प्रार्थयामास साध्वी भूयो महेश्वरम् ॥ ४७ ॥

Seeing these various (signs), ascertained that it was Vrshachaleshvara who had manifested, that good lady immediately bowed with humility, and prayed once more saying thus: "O Bhagavan! First show me the lilas that are appropriate for an infant".

ततः किशोरवत्सोऽपि किञ्चिद्विचलिताधरः।
ताडयन् चरणौ हस्तौ रुरोदैव क्षणादसौ ॥ ४८ ॥

Then that (Bhagavan Shiva) in the form of an infant and moved the lips slightly and kicking the legs and hands about, began to cry.

आर्या साऽपि तदैवासीन्मायामोहितमानसा।
जगन्मोहकरी माया महेशितुरनीदृशी ॥ ४९ ॥

Immediately Arya (forgetting that she saw Shiva a short while before) got her mind enchanted by Maya. The Maya of Maheshvara that enchants the entire universe is not ordinary!

तत्रत्यास्तु जना नार्यो नाविन्दन् वृत्तमीदृशम् ।
बालकं मेनिरे प्रोद्यदिन्दुबिम्बमिवोज्ज्वलम् ॥ ५० ॥
तत्रत्या वृद्धनार्योऽपि यथोचितमथाचरन् ।

Yet, (due to the same Maya) the people and women there did not know of the event that transpired (of Shiva's manifestation). They thought of Him as a boy who glowed like the face of the moon rising. The elderly women there then did their duties (to care for the new mother).

ततः श्रुत्वा पिता सोऽपि निधिं प्राप्येव निर्धनः ॥ ५१ ॥
मुमुदे नितरां चित्ते वित्तेशं नाभ्यलक्षत ।

Then, (hearing the news of the child's birth) the father (Shivaguru) rejoiced just as a poor man who had attained prosperity would. He did not even consider Kubera to be great (meaning that he considered himself wealthier than Kubera)

आविर्भावं तु जानाति शम्भोर्नाबोधयच्च सा ॥ ५२ ॥

Despite knowing the manifestation of Shiva, (Arya) did not announce it to the others.

स्नात्वा शिवगुरुर्यज्वा यज्वनामग्रणीस्ततः ।
विप्रानाकारयामास पुरन्ध्रीरपि सर्वतः ॥ ५३ ॥

After bathing (for the birth of the child), Shivaguru the most excellent Yajnika among Yajnikas, invited brahmanas and women from all over.

तदोत्सवो महानासीत् पुरे सद्मनि सन्ततम् ।
धान्यराशिं मखिभ्योऽसौ विद्भ्यो भूयः प्रदत्तवान् ॥ ५४ ॥

It was a great continuous celebration in that village and (especially) the home. He gave heaps of grains to those who performed yajnikas. He also gave (danam) to vidvans.

धनानि भूरि विप्रेभ्यो वेदविद्भ्यो दिदेश सः ।
वासांसि भूयो दिव्यानि सफलानि प्रदत्तवान् ॥ ५५ ॥

He gave away a lot of wealth to vaidikas who knew the Vedas. He gave many pure clothes along with fruits.

पुरन्ध्रीणां च नीरन्ध्रं वस्तुजातान्यदादसौ ।
घटोघ्नीर्बहुशो गाश्च सालङ्काराः सदक्षिणाः ॥ ५६ ॥
वृषाचलेशः सततं प्रीयतामित्यसौ ददौ ।

He gave the women (useful) things without lacking. He gave many decorated milch cows which yielded plentiful milk along with money (for

their care). He gave (all this) so that Vrshachaleshvara may be pleased.

ततः शिवगुरुर्यज्वा ब्राह्मणान् पूर्वतोऽधिकम् ॥ ५७ ॥
सन्तर्प्य बन्धुभिः सार्धं मुदितो न्यवसत् सुधीः ।

The wise yajnika Shivaguru pleased the relatives and brahmanas more than ever and lived happily.

बालभावे विशालाक्षमतिविस्तृतवक्षसम् ॥ ५८ ॥
आजानुलम्बितभुजं सुविशालनिटालकम् ।
आरक्तोपान्तनयनविनिन्दितसरोरुहम् ॥ ५९ ॥

In the form of a child with large eyes, a wide chest, hands extending upto the knees, a handsome broad forehead and eyes with redness at the ends that mocked the lotus in radiance...

मुखकान्तिपराभूतराकाहिमकराकृतिम् ।
भासा गौर्या प्रसृतया प्रोद्यन्तमिव भास्करम् ॥ ६० ॥

With the beauty of face that defeated the form of the full moon, with white radiance that was like the rising sun...

शङ्खचक्रध्वजाकाररेखाचिह्नपदाम्बुजम् ।
द्वात्रिंशल्लक्षणोपेतं विद्युदाभकलेवरम् ॥ ६१ ॥

With his lotus feet that had the lines with markings of the conch, discus and flag, with the thirty two lakshanas, a body (radiant) like lightning...

प्रमोदं दृष्टमात्रेण दिशन्तं तं स्तनन्धयम् ।
पायम्पायं दृशा प्रेम्णा श्रीकृष्णमिव गोपिका ॥ ६२ ॥
प्रपेदे न क्षणं तृप्तिं चकोरीव सुधाकरम् ।

... again and again lovingly drinking by her eyes that small infant, who gave happiness upon seeing, just as (Yashoda) the Gopika (saw) Shri Krishna, like the chakora bird (that eagerly drinks the rays) of the moon (continuously

looks at it), she never felt it was enough even for a moment.

तादृशं बालकं दृष्ट्वा त्वार्याम्बा शुभलक्षणम् ।
तिष्ठति स्म सुखेनैव लालयन्ती तनूभवम् ॥ ६३ ॥


Aryamba remained happy taking care of the boy who was born to her and endowed with all auspicious signs,

॥ इति श्रीचिद्विलासीयश्रीशङ्करविजयविलासे श्रीशङ्करभगवत्पादाचार्याणाम्
अवतारघट्टः सम्पूर्णः ॥

— The avataraghatta ends —

❁

# ॥ काञ्च्यां सर्वज्ञपीठारोहण-घट्टः ॥




YouTube https://youtu.be/Qe8BT0elhXM

## ॥ पञ्चविंशोऽध्यायः ॥

श्रीचक्रपश्चाद्भागे तु कामाक्षीं ज्ञानरूपिणीम् ॥ ४४ ॥
प्रतिष्ठाप्य च पूजायै ब्राह्मणान् विनियुज्य च ।
एकाम्रेश्वरपूजार्थं विप्रानादिश्य भूयसः ॥ ४५ ॥
श्रीमद्वरदराजस्य नमस्यायै नियुज्य च ।
सर्वज्ञपीठमारोढुमुत्सेहे देशिकोत्तमः ॥ ४६ ॥

After (once more) installing Kamakshi who is the embodiment of wisdom on the western side of the Shrichakra, appointing brahmanas for (Her) puja, and after appointing many brahmanas for the puja of Ekamreshvara and also for the worship of Varadaraja, the excellent Acharya was about to ascend the Sarvajna Pitham.

ततोऽशरीरिणी वाणी नभोमार्गाद् व्यजृम्भत ।
भो यतिन् भवता सर्वविद्यास्वपि विशेषतः ॥ ४७ ॥
कृत्वा प्रसङ्गं विद्वद्भिः जित्वा तान् अखिलानपि ।
सर्वज्ञपीठमारोढुम् उचितं ननु भूतले ॥ ४८ ॥

Then, an ashariri was heard loudly from the broad sky, "O ascetic! Would it not be appropriate if you ascend the Sarvajna Pitha after you debate all the panditas on this earth in all the fields of knowledge and after winning over all of them?"

इति वाचं समाकर्ण्य किमेतदिति विस्मितः ।

किञ्चिदालोचयन्नास्त किं करोमीति मानसे ॥ ४९ ॥

Hearing these words and thinking, "What is this?" in astonishment He was briefly thinking in his mind "what shall I do".

ताम्रपर्णीसरित्तीरवासिनो विबुधास्तदा ।
षड्दर्शिनीसुधावार्धिपारदृश्वगुणोन्नताः ॥ ५० ॥
आगत्य तं देशिकेन्द्रं प्रणिपत्येदमूचिरे ।

Then panditas who lived in the banks of Tamraparni river, and who had the fame of having seen the shores of the ocean of ambrosia of the six darshanas, came (there) and prostrated to that king among teachers saying thus:

भिदा सत्यमिवाभाति त्वया त्वैक्यं निगद्यते ॥ ५१ ॥
देवभेदो मूर्तिभेदः प्रत्यक्षेणात्र लक्ष्यते ।
स्वर्गादिफलभेदश्च सर्वशास्त्रविनिश्चितः ॥ ५२ ॥
तत्प्रत्यक्षं च मिथ्येति कथयस्यधुना यते ।

O Sanyasi! Difference seems real! You on the other hand speak of oneness. It is obvious that the devatas are many, (their) forms are many. It has also been determined in various shastras that the fruits (of sacrifices etc) such as svarga are different. Despite all this being evident, you now say that (these are only) illusions.

इति ब्रुवत्सु विद्वत्सु शङ्कराचार्यदेशिकः ॥ ५३ ॥
शृणुतात्रोत्तरं विप्राः ब्रह्मैकं तु सनातनम् ।
इन्द्रोपेन्द्रधनेन्द्राद्यास्तद्विभूतय एव हि ॥ ५४ ॥

while the scholars were saying thus, the teacher Shankaracharya (said): "O brahmanas! Hear the answer to this! Brahman alone is eternal. Indra, Vishnu, Kubera etc are (manifestations of) its powers."

मृदि कुम्भो यथा भाति कनके कङ्कणं यथा ।

जले वीचिर्यथा भाति तथेदं च विभाव्यते ॥ ५५ ॥

"Just as the pot (form) is seen in the clay, just as the bracelet is seen in gold, just as a wave is seen in water, similarly this (world appears in Brahman)."

यां देवतां भजन्ते ये तत्सारूप्यं प्रयान्ति ते ।
ये वा पुण्यं चरन्तीह ते स्वर्गे फलभोगिनः ॥ ५६ ॥

"Whoever worships whichever devata, attains that form. Those who do punya attain svarga. (This is said in shastras for the sake of those who already believe in loka vyavahara, and is thus indeed true while they are in lokavyavahara, however...)"

एको देव इति श्रुत्या जगत् सर्वं तदाकृतिः ।
तद्भिन्नमन्यन्नास्त्येव वेदान्तैकविनिश्चितम् ॥ ५७ ॥

"As per the statement of the Vedas that Ishvara is one, the entire world is His (variegated) form (only), and never anything distinct. This alone has been ascertained by the Upanishads."

तस्मादखण्डमात्मानमद्वयानन्दलक्षणम् ।
ज्ञात्वा गुरुप्रसादेन मुक्ता भवत नान्यथा ॥ ५८ ॥

"Therefore, understand the nature of the self, the one which is impartite (in itself) and one which does not have a second (other than itself) and is the nature of ananda, with the grace of the guru and attain liberation! (This can) not (happen) through other means."

श्रुतिस्मृतिपुराणोक्तैः वचनैरिति देशिकः ।
भेदवादरतान् विप्रान् आधायाद्वैतपारगान् ॥ ५९ ॥
ततस्ततो विपश्चिद्भिः प्रणतश्चातिभक्तितः ।

Thus with the help of statements given in Shrutis, Smrtis and Puranas, the Acharya made the brahmanas who asserted the difference (of Jiva and Brahman) slowly realise (the truth of) Advaita, and was worshipped with

deep devotion by (those) panditas.

गीतवादित्रनिर्घोषैः जयवादसमुज्ज्वलैः ॥ ६० ॥
आरुरोहाथ सर्वज्ञपीठं देशिकपुङ्गवः ।
पुष्पवृष्टिः पपाताथ ववुर्वाताः सुगन्धयः ॥ ६१ ॥

(Thus after winning the panditas from other parts of Bharat too in accordance with the ashariri), the excellent teacher ascended the Sarvajna Pitham to the accompaniment of songs and instruments, and adorned by the sounds of "Jaya Jaya". Then flowers rained from the skies and a fragrant breeze blew.

॥ इति श्रीचिद्विलासीयश्रीशङ्करविजयविलासे श्रीशङ्करभगवत्पादाचार्याणां काञ्च्यां सर्वज्ञपीठारोहणघट्टः सम्पूर्णः ॥

—Sarvajnapitharohanam ends—

# ॥ श्री-भगवत्पाद्-कीर्तन-नामावलिः ॥

The namavali-s before may be used in occasions such as Shri Bhagavatpada being taken as yatra in the village/area. Only the first paragraph below is continuously in our tradition. Devotees may adapt the content after that as appropriate. Only some examples are given. The first paragraph may be said again and again in the middle like a pallavi.

**जय जय शङ्कर हर हर शङ्कर ।**
**काञ्ची-शङ्कर कामकोटि-शङ्कर ।**

आदि-शङ्कर अद्वैत-शङ्कर ।
कालडि-शङ्कर कामाक्षि-शङ्कर ।

[जय जय … कामकोटि-शङ्कर ।]

आचार्य शङ्कर अद्भुत शङ्कर ।
अखण्ड शङ्कर आनन्द-शङ्कर ।

[जय जय … कामकोटि-शङ्कर ।]

उन्नत शङ्कर चिन्मय शङ्कर ।
अघहर शङ्कर सुखकर शङ्कर ।

[जय जय … कामकोटि-शङ्कर ।]

नररूप शङ्कर नतपाल शङ्कर ।
ज्ञानद शङ्कर मोक्षद शङ्कर ।

[जय जय … कामकोटि-शङ्कर ।]

भाष्यद शङ्कर भारत-शङ्कर ।

भुक्तिद शङ्कर मुक्तिद शङ्कर ।

[जय जय ... कामकोटि-शङ्कर ।]

भावुक शङ्कर भक्त-वशङ्कर ।
शिवकर शङ्कर शीतल शङ्कर ।

[जय जय ... कामकोटि-शङ्कर ।]

विद्वन् शङ्कर विवेक-शङ्कर ।
योगीन्द्र शङ्कर यतीन्द्र शङ्कर ।

[जय जय ... कामकोटि-शङ्कर ।]

साधो शङ्कर सज्जन-शङ्कर ।
सद्गुरु-शङ्कर सर्वज्ञ शङ्कर ।

[जय जय ... कामकोटि-शङ्कर ।]

❁